[illegible]

ॐ नमः शिवाय

ॐ नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं धर्मकामार्थसिद्धये ॥

श्री गुरवे नमः

पञ्चरत्न स्तोत्रावली

शुभ विक्रमादित्य सम्वत् २०२६
इस्वी सम्वत् १९६९

१८ अक्तूबर — श्री दुर्गाष्टमी

(मूल्य.........केवल स्वाध्याय)

श्री गुरु चरण कमलों में सादर
समर्पित



प्रकाशिका:— सौभाग्य रानी चन्ना
ए—४ वैम्लो शिमला
हिमाचल प्रदेश
मुद्रक :— भारती मुद्रणालय, ॐ निकेतन,
लक्कड़ बाजार शिमला—१
हिमाचल प्रदेश

विषय सूची

अथ गुरु स्तुतिः

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिम् ।
द्वन्द्वातीतं गगनसदृशं तत्वमस्यादिलक्ष्यम् ॥
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतम् ।
भावातीतं त्रिगुणरहितं सद्गुरु ं तं नमामि ॥

चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।
नादविन्दु ं कलातीतं गुरु ं नित्यं नमाम्यहम् ॥
गुरुर्ब्र ह्मा गुरुर्विष्णु र्गुरुः साक्षान्महेश्वरः ।
गुरुरेव जगत्सर्वं तस्मै श्री गुरवे नमः ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः ॥
नमामि सद्‌गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं धर्मकामार्थसिद्धये ॥
श्री गुरुं परमानन्दं वन्दे आनन्दविग्रहम् ।
यस्य सान्निध्यमात्रेण चिदानन्दायते परम् ॥
हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
सर्वदेवस्वरूपाय तस्मै श्री गुरवे नमः ॥
ध्यानमूलं गुरो र्मूर्त्तिः पूजामूलं गुरोः पदम् ।
ज्ञानमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥
ज्ञानिनां ज्ञानरूपाय प्रकाशाय प्रकाशिनाम् ।
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ॥
पूजितोऽसि मया भक्त्या भगवन् त्वं समादरात् ।
ब्रह्मरूपोऽसि मे स्वान्तं विश विश्रान्ति-हेतवे ॥

इति गुरु स्तुतिः

———

अथ गणेश स्तोत्राणि

ॐ विघ्नेशो नः स पायाद्विहृतिषु जलधिं पुष्कराग्रेण पीत्वा ।
यस्मिन्नुद्धृत्य हस्तं वमति तदखिलं दृश्यते व्योम्नि देवैः ॥
क्वाप्यम्भः क्वापि विष्णुः क्वचन कमलभूःक्वाप्यनन्तः क्वच श्रीः।
क्वाप्यौर्वः क्वापि शैलः क्वचन मणिगणः क्वापि नक्रादिसत्वाः॥

हेमजासुतं भुजम् गणेशमीशनन्दनम् ।
एकदन्तवक्रतुंडनागयज्ञसूत्रकम् ॥
रक्तगात्रधूम्रनेत्रशुक्लवस्त्रमण्डितम् ।
कल्पवृक्ष भक्तरक्ष नमोऽस्तु ते गजाननम् ॥
नमोस्तु ते गजाननम् नमोस्तु ते विनायकम् ।१।

पाशपाणिचक्रपाणिमूषकाँश्च रोहति ।
अग्निकोटिसूर्यज्योतिवज्रकोटिपर्वतम् ॥
चतुर्मालभक्तिजालबालचन्द्रशोभितम् ।
कल्पवृक्ष भक्तरक्ष नमोऽस्तु ते गजाननम् ।
नमोस्तु ते गजाननम् नमोस्तु ते विनायकम् ॥२॥

विश्ववीर्यंविश्वदीर्घंविश्वकर्म निर्मलम् ।
विश्वहर्ता विश्वकर्ता यत्र तत्र पूजितम् ॥
चतुर्भुजम् चतुर्मुखम् सेवितम् चतुर्युगम् ।
कल्पवृक्ष भक्तरक्ष नमोस्तु ते गजाननम् ॥
नमोस्तु ते गजाननम् नमोस्तु ते विनायकम् ॥३॥

भूतभव्य हव्यकव्य भवभर्ग वारितम् ।
देववह्नि — कालजाललोकपालवन्दितम् ॥
पूर्णब्रह्मसूर्यकर्म पौरुषं पुरान्तकम् ।
कल्पवृक्ष भक्तरक्ष नमोस्तु ते गजाननम् ॥
नमोस्तु ते गजाननम् नमोस्तु ते विनायकम् ॥४॥

ऋद्धिबुद्धि अष्टसिद्धि नवनिधानदायकम् ।
यज्ञकर्म सर्व धर्म वर्णवर्ण अर्चितम् ॥
धूतधूम्र दुष्टमुष्टिदायकम् धरान्तकम् ।
कल्पवृक्ष भक्तरक्ष नमोस्तु ते गजाननम् ॥
नमोस्तु ते गजाननम् नमोस्तु ते विनायकम् ॥५॥

———

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्तावासं स्मरेन्नित्यमायुः — कामार्थसिद्धये ।१।

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥२॥

लम्बोदरं पञ्चमं च षष्ठं विकटमेव च ।
सप्तमं विघ्नराजं च धूम्रवर्णं तथाष्टमम् ॥३॥
नवमं भालचन्द्रं च दशमं तु विनायकम् ।
एकादशं गणपतिं द्वादशं तु गजाननम् ॥४॥

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो ॥५॥

विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम् ॥६॥

जपेद्-गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् ।
संवत्सरेण सिद्धं च लभते नात्र संशयः ॥७॥

अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् ।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ॥८॥

अथ शिवस्तोत्राणि

शिवमहिम्नस्तोत्रम्

क्षेपकः ।। "आधीनामगदं दिव्यं व्याधीनां मूलकृन्तनम् ।
उपद्रवानां दलनं महादेवमुपास्महे ।।१।।

अहं पापी पापक्षपणनिपुणः शङ्कर ? भवान—
हं भीतो भीताऽभयवितरणे ते व्यसनिता ।
अहं दीनो दीनोद्धरण-विधिसज्जस्त्वमितरत् ।
न जानेऽहं वक्तुं कुरु सकल शोच्ये मयि कृपाम् ।।२।।

जनास्त्वत्पादाब्जश्रवणमननध्याननिपुणाः ।
स्वयं ते निस्तीर्णा न खलु करुणा तेषु करणा ।
भवे लीने दीने मयि मननहीने न करुणा ।
कथं नाथ ख्यातस्त्वमसि करुणासागर इति ।।३।।

ॐ महिम्नः पारं ते परमविदुषो यद्यसदृशी ।
स्तुतिर्ब्रह्मा-दीनामपि तदवसन्नास्त्वयि गिरः ।
अथाऽवाच्यः सर्वःस्वमतिपरिणामावधिगुणान् ।
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ।।१।।

अतीतः पन्थानं तव च महिमा वाङ्मनसयोः—
रतद्व्यावृत्या यं चकितमभिधत्ते श्रुतिरपि ।

स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः ।
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२॥

मधुस्फीता वाचः परमममृतं निर्मितवतः ।
तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः ।
पुनामीत्यर्थेऽस्मिन्पुरमथन ! बुद्धिर्व्यवसिता ॥३॥

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत् ।
त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन्वरद ! रमणीयामरमणीं ।
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥४॥

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनम् ।
किमाधारो धाता सृजति किमुपादानमिति च ।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः ।
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगताम् ॥५॥

अजन्मानो लोकाः किमवयववन्तोऽपि जगताम् ।
अधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद्भुवनजनने कः परिकरः ।
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति ।
प्रभिन्ने प्रस्थाने परमिदमधः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषाम् ।
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥७॥

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः ।
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहिताम् ।
नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥

ध्रुवं कश्चित्सर्वं सकलमपरस्तु ध्रुवमिदम ।
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन्पुरमथन ! तैर्विस्मित इव ।
स्तवञ्जिह्रेमि त्वा न खलु ननु धृष्टा मुखरता ॥९॥

तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्दवपुषः ।
ततो भक्तिश्रद्धाभरगुरु गृणद्भ्यां गिरिश ! यत् ।
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥

अयत्नादासाद्य त्रिभुवनमवैरिव्यतिकरं ।
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् ।

शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः ।
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर ! विस्फूर्जितमिदम् ॥११॥

अमुष्य त्वत्सेवासमधिगतसारं भुजवनम् ।
बलात्कैलासेपि त्वदधिवसतौ विक्रमयतः ।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि ।
प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः ॥१२॥

यदृद्धिं सुत्राम्णो वरद ! परमोच्चैरपि सती–
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ।
न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोः ।
न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३॥

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा ।
विधेयस्यासीद्यस्त्रिनयन ! विषं संहृतवतः ।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो ।
विकारोपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥१४॥

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे ।
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत् ।
स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः ॥१५॥

महो पादाघाताद्व्रजति सहसा संशयपदम् ।
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा ।
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥१६॥

वियद्व्यापि तारागणगुणितफेनोग्दमरुचिः ।
प्रवाहो वारां यः पृषतलघु दृष्टः शिरसि ते ।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम ! दिव्यं तव वपुः ॥१७॥

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो ।
रथाङ्गे चन्द्राकौं रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥१८॥

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुष-
स्त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमताम् ।
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।

अतस्त्वामुत्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवम् ।
श्रुतौ बद्ध्वा श्रद्धां दृढपरिकरः कर्मसु जनः ॥२०॥

क्रियादक्षो दक्षः क्रतुपतिरधीश स्तनुभृता-
मृषीणामार्त्विज्यं शरणद ! सदस्याः सुरगणाः ।
क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो ।
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥

प्रजानाथं नाथ प्रसभमभिकैः स्वां दुहितरम् ।
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुम् ।
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२॥

अपूर्वं लावण्यं विवसनतनोस्ते विमृशताम् ।
मुनीनां दाराणां समजनि स कोपव्यतिकरः ।
यतो भग्ने गुह्ये सकृदपि सपर्या विदधताम् ।
ध्रुवं मोक्षोऽश्लीलं किमपि पुरुषार्थप्रसवि ते ॥२३॥

स्वलावण्याशंसा धृतधनुष्यमह्नाय तृणवत् ।
पुरः प्लुष्टं दृष्ट्वा पुरमघन पुरुषायुधमपि ।
यदि स्त्रैणं देवी यमनिरतदेहार्धघटना-
दवैति त्वामद्धा वत वरद मुग्धा युवतयः ॥२४॥

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलम् ।
तथापि स्मर्तॄणां वरद परमं मङ्गलमसि ॥२५॥

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः ।
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।
यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये ।
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥२६॥

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहः ।
त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणतां बिभ्रतु गिरम् ।
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥२७॥

त्रयी तिस्त्री वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णै स्त्रिभिरभिदधत्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरनुरुन्धानमणुभिः ।
समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥२८।

भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।

अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि ।
प्रियायास्मै धाम्ने प्रणिहितनमस्योस्मि भवते ॥२९॥
वपुष्प्रादुर्भावादनुमितमिदं जन्मनि पुरा ।
पुरारे ! नैवाहं क्वचिदपि भवन्तं प्रणतवान् ।
नमन्मुक्तः सम्प्रत्यतनुरहमग्रेप्यनतिमान् ।
महेश ! क्षन्तव्यं तदिदमपराधद्वयमपि ॥३०॥
नमो नेदिष्ठाय प्रियदवदविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमति सर्वाय च नमः ॥३१॥
बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः ।
प्रबलतमसे तत्संसारे हराय नमो नमः ।
जनसुखकृते सत्वोद्रिक्तौ मृडाय नमो नमः ।
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३२॥
आ किं न रक्षसि नयत्ययमन्तको मां ।
हेलावलेपसमयः किमयं महेश ।
मा नाम भूत्करुणया हृदयस्य पीडा ।
व्रीडापि नास्ति शरणागतमुज्झतस्ते ? ।
इति श्री पुष्पदन्तविरचितं
शिवमहिमस्तोत्रमनुलेपनार्थम् ॥

—:o:—

अथ
रावणकृतदीनाक्रन्दाख्यशिव क्षमापनम्

ॐ गौरीश्वराय भुवनत्रयकारणाय ।
भक्तप्रियाय भवभीतिभिदे भवाय ।
शर्वाय दुःखशमनाय वृषध्वजाय ।
रुद्राय कालदहनाय नमः शिवाय ॥१॥

सर्वेश्वरत्वे सति भस्मशायिने ।
ह्यु मापतित्वे सति चोर्ध्वरेतसे ।
वित्तेशभृत्ये सति चर्मवाससे ।
निवृत्तरागाय नमस्तपस्विने ॥२॥

ॐ कारेण विहीनस्य नित्यमुद्विग्नचेतसः ।
तापत्रयाग्नितप्तस्य त्राणं कुरु महेश्वर ॥३॥

कायपोषणसक्तस्य रोगशोकाकुलस्य च ।
भवार्णवनिमग्नस्य त्राणं कुरु महेश्वर ॥४॥

मदनोरगदष्टस्य क्रोधाग्निज्वलितस्य च ।
लोभमोहादिसक्तस्य त्राणं कुरु महेश्वर ॥५॥

तृष्णाश्शृङ्खलया नाथ बद्धस्य भवपञ्जरे ।
कृपार्द्र दीनचित्तस्य त्राणं कुरु महेश्वर ॥६॥

भटैर्नानाविधैर्घोरैर्यमस्याज्ञाविधायकैः ।
तां दिशं नीयमानस्य त्राणं कुरु महेश्वर ॥७॥

दुष्टस्य नष्टचित्तस्य श्रेष्ठमार्गोज्झितस्य च ।
अनाथस्य जगन्नाथ त्राणं कुरु महेश्वर ॥८॥

संसारपाशदृढबन्धनपीडितस्य ।
मोहान्धकारविषमेषु निपातितस्य ।
कामार्दितस्य भयरागखलीकृतस्य ।
दीनस्य मे कुरु दयां परलोकनाथ ॥९॥

दीनोस्मि मन्दधिषणोस्मि निराश्रयोस्मि ।
दासोस्मि साधुजनतापरिवर्जितोस्मि ।
दुष्टोस्मि दुर्भगतमोस्मि गतत्रपोस्मि ।
धर्मोज्झितोस्मि विकलोस्मि कलङ्कितोस्मि ॥१०॥

भीतोस्मि भङ्गुरतमोस्मि भयानकोस्मि ।
शंकाशतव्यतिकराकुलचेतनोस्मि ।
रागादिदोषनिकरै र्मुखरीकृतोस्मि
सत्यादिशौचनियमैः परिवर्जितोस्मि ॥११॥

जन्माटवीभ्रमणमारुतखेदितोस्मि ।
नित्यामयोस्म्यशरणोस्म्यसमञ्जसोस्मि ।

आशानिरङ्कुशपिशाचिकयार्दितोस्मि ।
हास्योस्मि हा पशुपते शरणागतोस्मि ॥१२॥

हा हतोस्मि विनष्टोस्मि दष्टोस्मि चपलेन्द्रियैः
भवार्णवनिमग्नोस्मि किं त्रातुं मम नार्हसि ॥१३॥

यदि नास्मि महापापी यदि नास्मि भयातुरः।
यदि नेन्द्रियसंसक्तस्तत्कोर्थः शरणे मम ॥१४॥

आर्तो मत्सदृशो नान्यस्त्वत्तो नान्यः कृपापरः ।
तुल्य एवावयोर्योगः कथं नाथ न पाहि माम् ॥१५॥

आकर्णयाशु कृपणस्य वचांसि सम्यक्
लब्धोसि नाथ बहुभिर्ननु जन्मवृन्दैः ।
अद्य प्रभो यदि दयां कुरुषे न मे त्वं।
त्वत्तः परं कथय क्वं शरणं व्रजामि ॥१६॥

द्वेष्योहं सर्वजन्तूनां बन्धूनां च विशेषतः ।
सुहृद्वर्गस्य सर्वस्य किमन्यत्कथयामि ते ॥१७॥

मातापितृविहीनस्य दुःखशोकातुरस्य च ।
आशापाशनिबद्धस्य रागद्वेषयुतस्य च ॥१८॥

देवदेव जगन्नाथ शरणागतवत्सल ।
नान्यस्त्रातास्ति मे कश्चित्त्वदृते परमेश्वर ॥१९॥

भीतोस्मि कालवशगोस्मि निराश्रयोस्मि ;
खिन्नोस्मि दुःखजलधौ पतितोस्मि शम्भो ।
आर्त्तोस्मि मोहपटलेन समावृतोस्मि ।
त्वां चन्द्रचूडशरणं समुपागतोस्मि ॥२०॥

आशिखान्तं निमग्नोस्मि दुस्तरे भवकर्दमे ।
प्रसीद कृपया शम्भो पादाग्रेणोद्धरस्व माम् ॥२१॥

श्रुत्वा मे भवभीतस्य भगवन्करुणागिरः ।
तथा कुरु यथा भूयो न बाधन्ते भवापदः ॥२२॥

समयशतविलुप्तं भक्तिहीनं कुचैलम् ।
मलिनवसनगात्रं निर्दयं पापशीलम् ।
रविजभ्रुकुटिभीतं रोगिणं प्राप्तदुःखं ।
खलजनपरिभूतं रक्ष मां सर्वशक्ते । ॥२३॥

आपन्नोस्मि शरण्योसि सर्वावस्थासु सर्वदा ।
भगवंस्त्वां प्रपन्नोस्मि रक्ष मां शरणागतम् ॥२४॥

जातस्य जायमानस्य गर्भस्थस्यापि देहिनः ।
माभूत्तत्र कुले जन्म यत्र शम्भुर्न दैवतम् ॥२५॥

शङ्करस्य च ये भक्ताः शान्तास्तद्गतमानसाः ।
तेषां दासस्य दासोहं भूयां जन्मनि जन्मनि ॥२६॥

नमस्कारादिसंयुक्तं शिव इत्यक्षरद्वयम् ।
जिह्वाग्रे वर्तते यस्य सफलं तस्य जीवितम् ॥२७॥

यत्कृतं यत्करिष्यामि तत्सर्वं न मया कृतम् ।
त्वया कृतं तु फलभुक्त्वमेव परमेश्वर ॥२८॥

यदक्षरपदभ्रष्टं मात्राहीनं च यद्गतम् ।
मया दासेन विज्ञप्तं क्षम्यतां परमेश्वर ॥२९॥

इति श्रीरावणकृता दीनाक्रन्दनस्तुतिः ।

प्रदोष स्तोत्रम्

सत्यं ब्रवीमि परलोकहितं ब्रवीमि ।
सारं ब्रवीम्युपनिषद्हृदयं ब्रवीमि ।
संसारमुल्वणमसारमवापि जंतोः ।
सारोयमीश्वरपदांवुरुहस्य सेवा ॥१॥

ये नार्चयन्ति गिरिशं समये प्रदोषे ।
ये नार्चितं शिवमपि प्रणमन्ति चान्ये ।
एतत्कथां श्रुतिपुटैर्न पिबन्ति मूढा—
स्ते जन्मजन्मसु भवन्ति नराः दरिद्राः ॥२॥

ये वै प्रदोषसमये परमेश्वरस्य ।
कुर्वन्ति नान्यमनसाङ्घ्रिसरोजपूजाम् ।
नित्यं प्रवृध्दधनधान्यकलत्रपुत्र—
सौभाग्यसंपदधिकास्त इहैवलोके ॥३॥

कैलासशैलभवने त्रिजगज्जनित्री ।
गौरी निवेश्य कनकांचितरत्नपीठे ।
नित्यं विधातुमभिवांछति शूलपाणिम् ।
देवं प्रदोषसमयेऽनुभजन्ति सर्वे ॥४॥

वाग्देवी धृतवल्लकी शतमुखो वेणुदधत्पद्मज—
स्तालोन्निद्रकरो रमा भगवतीगेयप्रयोगान्विता ।
विष्णुः सांद्रमृदङ्गवादनपटुर्देवाः समंतात्स्थिताः ।
सेवन्ते तमनु प्रदोषसमये देवं मृडानीपतिम् ॥५॥

गन्धर्वयक्षपतगोरगसिध्दसाध्या ।
विद्याधराऽप्सरसांश्च गणास्तथैव ।
संयान्ति लोकनिलयं सहभूतवर्णाः ।
प्राप्ते प्रदोषसमये हरपार्श्वसंस्थाः ॥६॥

अ्रतः प्रदोषे शिव एवमेव ।
पूज्योथ नान्ये हरिपद्मज़ादयः ।
तस्मिन् महेशे विधिनेज्यमाने ।
सर्वे प्रसीदन्ति सुराधिनाथाः ॥७॥

अथ विष्णु स्तोत्राणि

ध्येयं सदा परिभवघ्नमभीष्टदोहम् ।
तीर्थास्पदं शिवविरञ्चिनुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपाल ! भवाब्धिपोतम् ।
वन्दे महापुरुष ते चरणारविन्दम् ॥१॥

त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीम् ।
धर्मिष्ठ ! आर्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सित मेऽनुधावत् ।
वन्दे महापुरुष ते चरणारविन्दम् ॥२॥

श्रीमत्सरोरुहयवांकुशचक्रचाप-
मत्स्याङ्कितं नवविलोहितपल्लवाभम् ।
लक्ष्म्यालयं परममङ्गलमात्मरूपम् ।
वन्दे महापुरुष ते चरणारविन्दम् ॥३॥

वृन्दावनान्तरमगादनु गोकुलानाम् ।
सञ्चार्य सर्वपशुभिः स्वविवृद्धिकामी ।
सञ्चिन्तयेदगगुरोर्मृगपक्षिणां यत्-
वन्दे महापुरुष ते चरणारविन्दम् ॥४॥
यद्गोपिका विरहजाग्निपरीतदेहाः ।
तप्तस्तनेषु विजहुः परिरभ्य तापम् ।

रासे तदीयकुचकुंकुमपंकलिप्तम् ।
वन्दे महापुरुष ते चरणारविन्दम् ॥५॥

कालीयमस्तकविघट्टनदक्षमस्य ।
मोक्षेप्सुभिर्विरहदीनमुखाभिरारात् ।
तत्पत्निभिः स्तुतमशेषनिकामरूपम् ।
वन्दे महापुरुष ते चरणारविन्दम् ॥६॥

ज्ञानालयं श्रुतिविमृग्यमनादिमर्च्यम् ।
ब्रह्मादिभिर्हृदि विचिन्त्यमगाधबोधः ।
संसारकूपपतितोत्तरणावलम्बम् ।
वन्दे महापुरुष ते चरणारविन्दम् ॥७॥

येनाङ्कपालवपुषः स्तनपानबुध्दे-
स्त्वदंघ्रिणा हृतमनो विपरीतचक्रम् ।
विध्वस्तभाण्डमपतद्भुवि गोपमूर्ते-
र्वन्दे महापुरुष ते चरणारविन्दम् ॥८॥

इत्यष्टकं पठति यः परमस्य पुंसो-
नारायणस्य निरयार्णवतारणस्य ।
सर्वाप्तिमाशु हृदये कुरुते मनुष्यैः ।
संप्राप्य देहविलयं लभते च मोक्षम् ॥९॥

———

मुकुन्दमाला स्तुतिः

ॐ वन्दे मुकुन्दमरविन्ददलाऽऽयताक्षम् ।
कुन्देन्दुशङ्खदशनं शिशुगोपवेशम् ।
इन्द्रादिदेवगणवन्दितपादपीठम् ।
वृन्दावनाऽऽलयमहं वसुदेवसूनुम् ॥१॥

श्रीवल्लभेति वरदेति दयापरेति ।
भक्तप्रियेति भवलुण्ठनकोविदेति ।
नाथेति नागशयनेति जगन्निवासे-
त्यालापिनं प्रतिदिनं कुरु मां मुकुन्द ॥२॥

जयतु जयतु देवो देवकीनन्दनोऽयम् ।
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गो-
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥३॥

मुकुन्द मूर्ध्ना प्रणिपत्य याचे ।
भवन्तमेकान्तमियन्तमर्थम् ।
अविस्मृतिस्त्वच्चरणारविन्दे ।
भवे भवे मेऽस्तु भवत्प्रसादात् ॥४॥

श्रीमुकुन्द पदाम्भोजमधुनः परमाद्भुतम् ।
यत्पायिनो न मुह्यन्ति, मुह्यन्ति यदपायिनः ॥५॥

नाऽहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः ।
कुम्भीपाकं गुरुमपि हरे ! नारकं नाऽपनेतुम् ।
रम्यारामामृदुतनुलतानंदने नाऽपि रन्तुम् ।
भावे भावे हृदयभवने भावयेयं भवन्तम् ॥६॥

नाऽस्था धर्मे न वसुनिचये, नैव कामोपभोगे ।
यद्यद्भव्यं भवतु भगवन् ! पूर्वकर्माऽनुरूपम् ।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि ।
त्वत्पादाऽम्भोरुह युगगता निश्चला भक्तिरस्तु ॥७॥

मा भैर्मन्दमनो ! विचिन्त्य बहुधा यामीश्चिरं यातना ।
नाऽमी नः प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणम् ।
लोकस्य व्यसनाऽपनोदनकरो दासस्य किं न क्षमः ॥८॥

मा मे स्त्रीत्वं मा च मे दासभावो —
मा मूर्खत्वं मा कुदेशेषु जन्म ।
मिथ्यादृष्टि र्मा च मे स्यात्कदाचि—
ज्जातौ जातौ विष्णुभक्तो भवामि ॥९॥

आनन्द ! गोविन्द !, मुकुन्द ! राम !,
नारायणाऽनन्त ! निरामयेति ।
वक्तुं समर्थोऽपि न वक्ति कश्चि —
दहोजनानां व्यसनानि मोक्षे ॥१०॥

इदं शरीरं परिणामपेशलम् ।
पतत्यवश्यं श्लथसन्धिजर्जरम् ।
किमौषधैः क्लिश्यसि मूढ दुर्मते, ।
निरामयं कृष्णरसायनं पिव ॥११॥

यत्कृष्णप्रणिपातधूलिधवलं तद्वै शिरः स्याच्छुभम् ।
ते नेत्रे तमसोज्झिते सुरुचिरे याभ्यां हरिर्दृश्यते ।
सा बुद्धिर्नियमैर्यमैश्च विमला या माधवध्यायिनी ।
सा जिह्वाऽमृतवर्षिणी प्रतिपदं या स्तौति नारायणम् ॥१२॥

अथ चर्पटपञ्जरिका स्तोत्रम्

दिनमपि रजनी सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीड़ति गच्छत्यायुस्तदपि न मुञ्चत्याशापायुः ॥१॥

भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढमते ।
प्राप्ते सन्निहिते मरणे नहि नहि रक्षाति डुकृञ् करणे ।
(ध्रुवपदम्)

अग्रे वह्निः पृष्ठे भानू रात्रौ चिबुकसमिपतजानुः ।
करतलभिक्षा तरुतलवासस्तदपि न मुञ्चत्याशापाशः
।भज० ॥२॥

यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारे रक्तः ।
पश्चाद्धावति जर्जरदेहे वार्तां पृच्छति कोऽपि न गेहे
।भज० ॥३॥

जटिलो मुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेषः ।
पश्यन्नपि च न पश्यति लोको ह्यदरनिमित्तं बहुकृतशोकः
।भज० ॥४॥

भगवद्गीता किञ्चदधीता गङ्गाजललवकणिका पीता ।
सकृदपि यस्य मुरारिसमर्चा तस्य यमः किं कुरुते चर्चाम्
।भज० ॥५॥

अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।
वृध्दो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम्
।भज० ॥६॥

बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणी रक्तः ।
वृध्दस्तावच्चिन्तामग्नः पारे ब्रह्मणि कोऽपि न लग्नः
।भज० ॥७॥

पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे खलु दुस्तारे कृपयापारे पाहि मुरारे
।भज० ॥८॥

पुनरपि रजनी पुनरपि दिवसः पुनरपि पक्षः पुनरपि मासः ।
पुनरप्ययनं पुनरपि वर्षं तदपि न मुञ्चत्याशामर्षम्
।भज० ॥९॥

वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ।
नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः
।भज० ॥१०॥

नारीस्तनभरनाभिनिवेशं मिथ्यामायामोहावेशम् ।
एतन्मांसवसादिविकारं मनसि विचारय बारम्बारम्
।भज० ॥११॥

कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम्
।भज० ॥१२॥

गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।
नेयं सज्जनसङ्गे चित्तं देयं दीनजनाय च वित्तम्
।भज० ॥१३॥

यावज्जीवो निवसति देहे कुशलं तावत्पृच्छति गेहे ।
गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये
।भज० ॥१४॥

सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः ।
यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम्
।भज० ॥१५॥

रथ्याचर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः ।
नाहं न त्वं नायं लोकस्तदपि किमर्थं क्रियते शोकः
।भज० ॥१६॥

कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीनः सर्वमतेन मुक्तिं न भजति जन्मशतेन
।भज० ॥१७॥

अथ सूर्याष्टकम्

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ।१।

सप्ताश्वरथमारूढं प्रचण्डं कश्यपात्मजम् ॥
श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् ॥२॥

लोहितं रथमारूढं सर्वं लोकपितामहम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥३॥

त्रैगुण्यं च महाशूरं ब्रह्मविष्णुमहेश्वरम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥४॥
बृंहितं तेजःपुञ्जं च वायुमाकाशमेव च ।
प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहम् ॥५॥
बन्धूकपुष्पसङ्काशं हारकुण्डलभूषितम् ।
एकचक्रधरं देवं तं सूर्यं प्रणमाम्यहम् ॥६॥
तं सूर्यं जगकर्तारं महातेजःप्रदीपनम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥७॥
तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥८॥

— —

अथ देवी स्तोत्राणि

भवानी नाम सहस्र

ॐनमो भगवत्यै ॐनमो भवान्यै

सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भि र्भुजैः ।
शखं चक्रधनुः शरांश्च दधती नेत्रैस्त्रिभिः शोभिता ।।

आमुक्तांगदहारकंकणरणत्काञ्चीक्वणन्नूपुरा ।
दुर्गा दुर्गतिहारिणी भगवती रत्नोल्लसत्कुण्डला ।।

ॐ शंखत्रिशूलशरचापकरां त्रिनेत्राम् ।
तिग्मेतरांशकलया विलसत्किरीटाम् ।
सिंहस्थितामसुरसिद्धनुतां च दुर्गाम्, ।
दुर्गानिभां दुरितदुःखहरां नमामि ।।

ॐ अकुलकुलपतंती चक्रमध्ये स्फुरंती ।
मधुरमधु पिबंती कंटकान्भक्षयंती ।
दुरितमपहरंती साधकान्पोषयंती ।
जयति जगति देवी सुंदरी क्रीडयंती ।।

चतुर्भुजामेकवक्त्रां पूर्णेन्दुवदनप्रभाम् ।
खड्गशक्तिधरां देवीं वरदाभयपाणिकाम् ।

प्रेतसंस्थां महारौद्रीं भुजगेनोपवर्तिनीम् ।
भवानीं कालसंहारबद्धमुद्राविभूषिताम् ॥

जगत्स्थितिकरीं ब्रह्मविष्णुरुद्रादिभिः सुरैः ।
स्तुतां तां परमेशानीं नौम्यहं विघ्नहारिणीम् ।
ॐ नमो भवान्यै ।

ॐ कैलास शिखरे रम्ये देवदेवं महेश्वरम् ।
ध्यानोपरतमासीनं प्रसन्नमुखपंकजम् ॥

सुरासुरशिरोरत्नरंजितांघ्रियुगं प्रभुम् ।
प्रणम्य शिरसा नंदी बद्धाँजलिरभाषत ॥
श्रीनंदिकेश्वर उवाच ।
देवदेव जगन्नाथसंशयोऽस्ति महान्मम ।
रहस्यमेकमिच्छामि प्रष्टुं त्वां भक्तवत्सल ॥

देवतायास्त्वया कस्याःस्तोत्रमेतद्दिवानिशम् ।
पठ्यतेऽविरतं नाथ त्वत्तः किमपरं महत् ।
इति पृष्टस्तदा देवो नंदिकेन जगद्गुरुः ।
प्रोवाच भगवानेको विकसन्नेत्रपंकजः ॥
श्रीभगवानुवाच ।
साधु साधु गणश्रेष्ठ पृष्ठवानसि मां च यत् ।

स्कंदस्यापि च यद्गोप्यं रहस्यं कथयामि तत् ॥
पुरा कल्पक्षये लोकान् सिसृक्षु-र्मूढचेतसः ।
गुणत्रयमयी शक्तिर्मूलप्रकृतिसंज्ञिता ॥
तस्यामहं समुत्पन्नस्तत्त्वैस्तैर्महदादिभिः ।
चेतनेति ततः शक्तिर्मां काऽप्यालिंग्य तस्थुषो ॥
हेतुःसंकल्पजालस्य मनोऽधिष्ठायिनी शुभा ।
इच्छेति परमा शक्तिरुन्मिमील ततः परम् ॥
ततो वागिति विख्याता शक्तिः शब्दमयी पुरा ।
प्रादुरासीज्जगन्माता वेदमाता सरस्वती ॥
ब्राह्मी च वैष्णवी सैंद्री कौमारी पार्वती शिवा ।
सिद्धिदा बुद्धिदा शांता सर्वमंगलदायिनी ॥
तयैतत्सृज्यते विश्वमनाधारं च धार्यते ।
तयैतत्पाल्यते सर्वं तस्यामेव प्रलीयते ॥
अर्चिता प्रणत ध्याता सर्वभावविनिश्चितैः ।
आराधिता स्तुता सैव सर्वसिद्धिप्रदायिनी ॥
तस्या अनुग्रहादेव तामेव स्तुतवानहम् ।
सहस्रैर्नामभिर्दिव्यै स्त्रैलोक्यप्राणिपूजितैः ॥

स्तवेनानेन संतुष्टा मामेव प्रविवेश सा ।
तदारभ्य मया प्राप्तमैश्वरं पदमुत्तमम् ।
तत्प्रभावान्मया सृष्टं जगदेतच्चराचरम् ।
ससुरासुरगंधर्वं यक्षराक्षसमानवम् ॥
सपन्नगं साब्धिकं च सशैलवनकाननम् ।
सराशिग्रहनक्षत्रं पंचभूतगुणान्वितम् ॥
नंदिन्नामसहस्रेण स्तवेनानेन सर्वदा ।
स्तुवे परापरां शक्तिं ममानुग्रहकारिणीम् ॥
इत्युक्त्वोपरतं देवं चराचरगुरुं विभुम् ।
प्रणम्य शिरसा नंदी प्रोवाच परमेश्वरम् ॥

श्रीनंदिकेश्वर उवाच ।

भगवन्देवदेवेश लोकनाथ जगत्पते ।
भक्तोऽस्मि तव दासोऽस्मि प्रसादःक्रियतां मयि ।
देव्याः स्तवमिमं पुण्यं दुर्लभं यत्सुरैरपि ।
श्रोतुमिच्छाम्यहं देव प्रभावमपि चास्य तु ॥

श्रीभगवानुवाच ।

शृणु नंदिन्महाभाग स्तवराजमिमं शुभम् ।
सहस्रैर्नामभिर्दिव्यैः सिद्धिदं सुखमोक्षदम् ॥

शुचिभिः प्रातरुत्थाय पठितव्यं समाहितैः ।
त्रिकालं श्रद्धया युक्तैर्नातः परतरः स्तवः ।।

अथ न्यासः ॐएकवीरायै अंगुष्ठाभ्यां नमः ।
ॐ महामायायै तर्जनीभ्यां नमः ॐपार्वत्यै मध्यमाभ्यां नमः
ॐगिरिशप्रियायै अनामिकाभ्यां नमः गौर्यै कनिष्ठिकाभ्यां
नमः ओम् करालिन्यै करतलकरपृष्ठा-
भ्यां नमः ओम् एकवीरायै हृदयाय
नमः ओम् महामायायै शिरसे स्वाहा ।
ओम् पार्वत्यै शिखायै वषट् ओम् गिरिश प्रियायै कवचाय हुम्
ओम् गौर्यै नेत्रत्रयाय वौषट् करालिन्यै-
अस्त्रायफट् ओम् अस्य श्रीभवानीनामसहस्र
स्तवराजस्य श्रीभगवान्महादेव ऋषिः अनुष्टुप् छन्दः ।
आद्या शक्तिः श्रीभगवती भवानी देवता ह्रीं बीजं श्रीं शक्तिः
क्लीं कीलकम् श्रीभवानीसंतोषणार्थे
सकलकामनासिद्ध्यर्थे पाठे जपे विनियोगः ।।

अथ ध्यानम्

अर्धेन्दुमौलिममलाममरामिवन्द्या-
मम्भोजपाशसृणिरक्तकपाल हस्ताम्
रक्ताङ्गरागवसनाभरणांत्रिनेत्राम् ।
ध्यायेच्छिवस्य वनितां मदविह्वलांगीम् ।।

ओम् बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशांकुशशरं चापं धारयंतीं शिवां भजे ।

ॐ श्री ईश्वर उवाच

ओम्महाविद्या जगन्माता महालक्ष्मी: शिवप्रिया ।
विष्णुमाया शुभा शांता सिद्धा सिद्धसरस्वती ।
क्षमा कांति: प्रभा ज्योत्स्ना पार्वती सर्वमंगला ।
हिंगुला चंडिका दांता पद्मलक्ष्मी र्हरिप्रिया ॥

त्रिपुरा नंदिनी नंदा सुनंदा सुरवंदिता ।
यज्ञविद्या महामाया वेदमाता सुधा धृतिः ॥
प्रीति: प्रथा प्रसिद्धा च मृडानी विंध्यवासिनी ।
सिद्धविद्या महाशक्तिः पृथ्वी नारदसेविता ॥
पुरुहूतप्रिया कांता कामिनी पञ्चलोचना ।
प्रह्लादिनी महामाता दुर्गा दुर्गतिनाशिनी ॥

ज्वालामुखी सुगोत्रा च ज्योति: कुमुदहासिनी ।
दुर्गमा दुर्लभा विद्या स्वर्गति: पुरवासिनी ॥
अपर्णा शांबरी माया मदिरा मृदुहासिनी ।

कुलवागीश्वरी नित्या नित्यक्लिन्ना कृशोदरी ॥
कामेश्वरी च नीला च भीरुण्डा वह्निवासिनी ॥
लंबोदरी महाकाली विद्या विद्येश्वरी तथा ॥

नरेश्वरी च सत्या च सर्वसौभाग्यवर्धिनी ।
संकर्षणी नारसिंही वैष्णवी च महोदरी ।
कात्यायनी च चंपा च सर्वसंपत्तिकारीणि ।
नारायणी महानिद्रा योगनिद्रा प्रभावती ।।

प्रज्ञापा रमिता प्रज्ञा तारा मधुमती मधु ।
क्षीरार्णवसुधाहारा कालिका सिंहवाहना ।।

ओम् कारा च सुधाकारा चेतना कोपना कृतिः ।
अर्धबिन्दुवरा धारा विश्वमाता कलावती ।।
पद्मावती सुवस्त्रा च प्रबुद्धा च सरस्वती ।
कुंडासना जगद्धात्री बुद्धमाता जिनेश्वरी ।।

जिनमाता जिनेंद्रा च शारदा हंसवाहना ।
राज्यलक्ष्मी वषट्कारा सुधाकारा सुधोत्सुका ।।
राजनीतिस्त्रयी वार्ता दण्डनीतिः—क्रियावती ।
सद्भूतिस्तारिणी श्रद्धा सद्गतिः सत्परायणा ।।
सिंधुर्मन्दाकिनी गंगा यमुना च सरस्वती ।
गोदावरी विपाशा च कावेरी च शतह्रदा ।।
सरयूश्चंद्रभागा च कौशिकी गंडकी शुचिः ।
नर्मदा कर्मनाशा च चर्मण्वत्यथ वेदिका ।।

वेत्रवती वितस्ता च वरदा नरवाहना ।
सती पतिव्रता साध्वी सुचक्षुः कुंडवासिनी ॥

एकचक्षुः सहस्राक्षी सुश्रोणिर्भगमालिनी ।
सेना श्रेणिः पताका च सुव्यूहा युद्धकांक्षिणी ॥

पताकिनी दया रंभा विपंची पंचमप्रिया ।
परापरकला कांता त्रिशक्तिर्मोक्षदायिनी ॥

ऐंद्री माहेश्वरी ब्राह्मी कौमारी कूलवासिनी ।
इच्छा भगवती शक्तिः कामधेनुः कृपावती ॥

वज्रायुधा वज्रहस्ता चंडी चण्डपराक्रमा ।
गौरी सुवर्णवर्णा च स्थितिसंहारकारिणी ॥

एकानेका महेज्या च शतबाहु र्महाभुजा ।
भुजंगभूषणा भूषा षट्चक्रक्रमवासिनी ॥

षट्चक्रभेदिनी श्यामा कायस्था कायवर्जिता ।
सुस्मिता सुमुखी क्षामा मूलप्रकृतिरीश्वरी ॥

अजा च बहुवर्णा च पुरुषार्थप्रवर्तिनी ।
रक्ता नीला सिता श्यामा कृष्णा पीता च कर्बुरा ॥

क्षुधा तृष्णा जरा वृद्धा तरुणी करुणालया ।
कला काष्ठा मुहूर्ता च निमिषा कालरूपिणी ॥

सुवर्णरशना नासा चक्षुःस्पर्शवती रसा ।
गंधप्रिया सगंधा च सुस्पर्शा च मनोगतिः ॥
मृगनाभिर्मृगाक्षी च कर्पूरामोदधारिणी ।
पद्मयोनिः सुकेशी च सुलिङ्गा भगरूपिणी ॥
योनिमुद्रा महामुद्रा खेचरी खगगामिनी ।
मधुश्रीर्माधवी वल्ली मधुमत्ता मदोद्धता ॥
मातंगी शुकहस्ता च पुष्पबाणेक्षुचापिनी ।
रक्तांबरधरा क्षीबा रक्तपुष्पावतंसिनी ॥
शुभ्राबर धरा धीरा महाश्वेता वसुप्रिया ।
सुवेणी पद्महस्ता च मुक्ताहारविभूषणा ॥
कर्पूरामोदनिश्वासा पद्मिनी पद्ममंदिरा ।
खड्गिनी चक्रहस्ता च भुशुंडी परिघायुधा ॥
चापिनी पाशहस्ता च त्रिशूलवरधारिणी ।
सुबाणशक्तिहस्ता च मयूरवरवाहना ॥
वरायुधधरा वीरा वीरपानमदोत्कटा ।
वसुधा वसुधारा च जया शाकंभरी शिवा ।
विजया च जयंती च सुस्तनी शत्रुनाशिनी ।
अंतर्वत्नी वेदशक्तिर्वरदा वरधारिणी ॥

शीतला च सुशीला च बालग्रहविनाशिनी ।
कौमारी च सुपर्वा च कामाख्या कामवंदिता ।।

जालंधरधरानंता कामरूपनिवासिनी ।
कामबीजवती सत्या सत्यधर्मपरायणा ।।

स्थूलमार्गस्थिता सूक्ष्मा सूक्ष्मबुद्धिप्रवोधिनी ।
षट्कोणा च त्रिकोणा च त्रिनेत्रा त्रिपुरसंदरी ।।

वृषप्रिया वृषारूढा महिषासुरघातिनी ।
शुंभदर्पहरा दीप्ता दीप्तपावकसन्निभा ।।

कपालभूषणा काली कपालमालधारिणी ।
कपालकुण्डला दीर्घा शिवदूती घनध्वनिः ।।

सिद्धिदा बुद्धिदा नित्या सत्यमार्गप्रबोधिनी ।
कम्बुग्रीवा वसुमती च्छत्रच्छाया कृतालया ।।

जगदगर्भा कुण्डलिनी भुजगाकारशायिनी ।
प्रोल्लसत्सप्तपद्मा च नाभिनालमृणालिनी ।।

मूलाधारा निराकारा वह्निकुण्डकृपालया ।
वायुकुण्डसुखासीना निराधारा निराश्रया ।।

श्वसोच्छ्वासगति जीवग्राहिणी वह्निसंश्रया ।
वल्ली तंतुसमुत्थाना षड्रसा स्वादलोलुपा ।।
तपस्विनी तपःसिद्धिस्तपसा सिद्धिदायिनी ।
तपोनिष्ठा तपोयुक्ता तापसी च तपःप्रिया ।।
सप्तधातुमयी मूर्तिःसप्तधात्वंतराश्रया ।
देहपुष्टि मंनःपुष्टिरन्नपुष्टिर्बलोद्धता ।।

ओषधि वैद्यमाता च द्रव्यशक्तिप्रभाविनी ।
वैद्या वैद्यचिकित्सा च सुपथ्या रोगनाशिनी ।।

मृगया मृगमांसादा मृगत्वङ् मृगलोचना ।
वागुरा बंधरूपा च बंधरूपा वधोद्धता ।।

बंदी बन्दिस्तुता कारा गारबन्धविमोचिनी ।
शृंखला खलहा विद्या दृढबन्धविमोचिनी ।।
अंबिका बालिका चांबा स्वक्षा साधुजनार्चिता ।
कौलिकी कुलविद्या च सुकुला कुलपूजिता ।।
कालचक्रभ्रमि भ्रांता विभ्रामा भ्रमनाशिनी ।
वात्याली मेघमाला च सुवृष्टिः सस्यवर्धिनो ।।

अकारा च इकारा च उकारैकाररूपिणी ।
ह्रींकारी बीजरूपा च क्लींकारांवरवासिनी ।।

सर्वाक्षरमयी शक्तिरक्षरा वर्णमालिनी ।
सिंदूरारुणवर्णा च सिंदूरतिलकप्रिया ।।

वश्या च वश्यबीजा च लोकवश्यविभाविनी ।
नृपवश्या नृपैःसेव्या नृपवश्यकरी प्रिया ।।

महिषा नृपमान्या च नृमान्या नृपनंदिनी ।
नृपधर्ममयी धन्या धनधान्यविवर्धिनी ।।
चतुर्वर्णमयी मूर्तिश्चतुर्वर्णैश्च पूजिता ।
सर्वधर्ममयी सिद्धिश्चतुराश्रमवासिनी ।।

ब्राह्मणी क्षत्रिया वैश्या शूद्रा चावरवर्णजा ।
वेदमार्गरता यज्ञा वेदिर्विश्वविभाविनी ।।

अस्त्रशस्त्रमयी विद्या वरशस्त्रास्त्रधारिणी ।
सुमेधा ·त्यमेधा च भद्रकाल्यपराजिता ।।

गायत्री सत्कृतिः सन्ध्या सावित्री त्रिपदाश्रया ।
त्रिसंध्या त्रिपदी धात्री सुपर्वा सामगायनो ।।

पांचाली बालिका बाला बालक्रीडा सनातनी ।
गर्भाधारधरा शून्या गर्भाशयनिवासिनी ।।

सुरारिघातिनी कृत्या पूजना च तिलोत्तमा ।
लज्जा रसवती नंदा भवानी पापनाशिनी ।।

पट्टांबरधरा गीतिः सुगीतिर्ज्ञानलोचना ।
सप्तस्वरमयी तंत्री षड्जमध्यम धैवता ।।

मूर्च्छना ग्रामसंस्थाना मूर्च्छा सुस्थानवासिनी ।
अट्टाट्टहासिनी प्रेता प्रेतासननिवासिनी ।
गीतनृत्यप्रिया कामा तुष्टिदा पुष्टिदा क्षया ।
निष्ठा सत्यप्रिया प्रज्ञा लोलाक्षी च सुरोत्तमा ।।

सविषा ज्वालिनी ज्वाला विश्वमोहार्तिनाशिनी ।
विषारिर्नागदमनी कुरुकुल्यामृतोद्भवा ।
भूतभीतिहरा रक्षा भूतावेशविनाशिनी ।
रक्षोघ्नी राक्षसी रात्रिर्दीर्घनिद्रानिवारिणो ।।

चंद्रिका चंद्रकांतिश्च सूर्यकांतिर्निशाचरी ।
डाकिनी शाकिनी शिष्या हाकिनी चक्रवाकिनी ।।

सिता सितप्रिया स्वंगा सकला वनदेवता ।
गुरुरूपधरा गुर्वी मृत्युर्मारी विशारदा ।।
महामारी विनिद्रा च तंद्रा मृत्युविनाशिनी ।
चंद्रमंडलसंकाशा चंद्रमंडलवासिना ।।

अणिमादिगुणोपेता सुस्पृहा कामरूपिणी ।
अष्टसिद्धिप्रदा प्रौढा दुष्टदानवघातिनी ।।

अनादिनिधना पुष्टिश्चतुर्बाहु श्चतुर्मुखी ।।
चतु:समुद्रशयना चतुर्वर्गफलप्रदा ।।

काशपुष्पप्रतीकाशा शरत्कुमुदलोचना ।
भूता भव्या भविष्या च शैलजा शैलवासिनी ।।

वाममार्गरता वामा शिववामांगवासिनी ।
वामाचारप्रिया तुष्टिर्लोपामुद्रा प्रबोधिनी ।।

भूतात्मा परमात्मा च भूतभावविभाविनी !
मंगला च सुशीला च परमार्थप्रबोधिनी ।।

दक्षिणा दक्षिणामूर्तिः सुदीक्षा च हरिप्रसूः ।
योगिनी योगयुक्ता च योगांगा ध्यानशालिनी ।।
योगपट्टधरा मुक्ता मुक्तानां परमागतिः ।
नारसिंही सजन्मा च त्रिवर्गफलदायिनी ।।

धर्मदा धनदा चैका कामदा मोक्षदा द्युतिः
साक्षिणी क्षणदा दक्षा मोक्षदा कोटिरूपिणी ।।

ऋतुः कात्यायिनी स्वच्छा स्वच्छंदा च कविप्रिया ।
सत्यागमा बहिस्था च काव्यशक्तिः कवित्वदा ।।

मीनपुत्री सती माता मैनाकभगिनी तडित् ।
सौदामिनी सुदामा च सुदामाधामशालिनी ।।

सौभाग्यदायिनी द्यौश्च सुभगा द्यु तिवर्धिनी ।
श्रीकृत्तिवसना चैव कंकाली कलिनाशिनी ।।

रक्तबीजवधोद्यु क्ता, सुतंतुर्बीजसंततिः ।
जगज्जीवा जगद्बीजा जगत्त्रयहितैषिणी ।।

चामीकररुचिश्चांद्री साक्षाद्या षोडशीकला ।
यत्तत्पदानुबन्धा च यक्षिणी धनदार्चिता ।।

चित्रिणी चित्रमाया च विचित्रा भुवनेश्वरी ।
चामुंडा मुंडहस्ता च चंडमुंडवधोद्यता ।।

अष्टम्येकादशी पूर्णा नवमी च चतुर्दशी ।
अमा कलशहस्ता च पूर्णकुंभपयोधरा ।।

अभीरुर्भैरवी भीरुभीमा त्रिपुरभैरवी ।
महारुंडा च रौद्री च महाभैरवपूजिता ।।

निमुंडा हस्तिनी चंडा करालदशनानना ।
कराला विकराला च घोरा घुर्घुरनादिनी ।।

रक्तदंतोर्ध्वकेशी च बन्धूककुसुमारुणा ।
कादंबिनी पटा सा च काश्मरी कुंकुमप्रिया ।।

क्षांतिर्बहुसुवर्णा च रतिबहुसुवर्णदा ।
मातंगिनी वरारोहा मत्तमातंगगामिनी ।।

हंसा हंसगतिर्हंसा हंसोज्ज्वलशिरोरुहा ।
पूर्णचंद्रमुखी क्षामा स्मितास्या श्यामकुण्डला ।।

मषी च लेखनी लेखा सुलेखा लेखकप्रिया ।
शंखिनी शंखहस्ता च जलस्था जलदेवता ।।

कुरुक्षेत्राबनि: काशा मथुरा कांच्यवंतिका ।
अयोध्या द्वारिका माया तीर्थातीर्थंकरप्रिया ।।

त्रिपुष्करा प्रमेया च कोशस्था कोशवासिनी ।
कौशिको तु कुशावर्ता कौशाम्वी कोशवर्द्धिनी ।।

कोशदा पद्मकोशाक्षी कुसुंभकुसुमप्रिया ।
तोतला च तुलाकोटि: कोटस्था कोटराश्रया ।।

स्वयंभूश्च सुरूपा च स्वरूपा पुण्यवर्धिनी ।
तेजस्विनो सुभिक्षा च बलदा बलदायिनी ।।

महाकोशी महावार्ता बुद्धि: सदसदात्मिका ।
महाग्रहहरा सौम्या विशोका शोकनाशिनी ।।

सात्विकी सत्वसंस्था च राजसी च रजोवती ।
तामसी च तमोयुक्ता गुण.त्रयविभाविनी ।।

अव्यक्ता व्यक्तरूपा च वेदविद्या च शांभवी ।
शंक रा कल्पिनी कल्पा मन:संकल्पसंतति

सर्वलोकमयी शक्तिः सर्वश्रवणगोचरा ।
सर्वज्ञानवती वांछा सर्वतत्त्वावबोधिका ।।

जागृतिश्च सुषुप्तिश्च स्वप्नावस्था तुरीयका ।
सत्वरा मंदरा मंदा मदिरामोदधारिणी
पानभूमिः पान पात्रपानदानकरोद्यता ।
अपर्णारुणनेत्रा च किंचिदव्यक्तभाषिणी ।
आशापूरा च दीक्षा च दक्षा दीक्षित पूजिता ।।
नागवल्ली नागकन्या भोगिनी भोगवल्लभा ।
सर्वशास्त्रमयी विद्या सुस्मृतिर्धर्मवादिनी ।।

श्रुतिस्मृतिधरा ज्येष्ठा श्रेष्ठा पातालवासिनी ।
मीमांसा तर्कविद्या च सुभक्तिभक्तवत्सला ।।

सुनाभियातना जातिर्गंभीरा भाववर्जिता ।
नागपाशधरा मूर्तिरगाधा नागकुंडला ।।

सुचक्रा चक्रमध्यस्था चक्र कोणनिवासिनी ।
सर्वमंत्रमयी विद्या सर्वमंत्राक्षरावलिः ।।

मधुस्रवा स्रवंती च भ्रामरी भ्रामरालका ।
मातृमंडलमध्यस्था मातृमंडलवासिनी ।।

कुमारजननी क्रूरा सुमुखी ज्वरनाशिनी ।
अतीता विद्यमाना च भाविनी प्रीतिमञ्जरी ।।

सर्वसौख्यवती युक्तिराहारपरिणामिनी ।
निधाना पञ्चभूतानां भवसागरतारिणी ॥

अक्रूरा च ग्रहवती विग्रहा ग्रहवर्जिता ।
रोहिणी भूमिगर्भा च कालभूः कालवर्तिनो ॥

कलंकरहिता नारी चतुःषष्ट्यभिधावतो ।
जीर्णा च जीर्णवस्त्रा च नूतना नववल्लभा ॥

अरजा च रतिप्रीतिरतिरागविवर्धिनी ।
पंचवातगतिर्भिन्ना पंचश्लेष्माशयाधरा ॥

पंचपित्तवती शक्तिः पंचस्थानविभाविनी ।
उदक्या च वृषस्यंती बहिः प्रस्रवणी त्र्यहा ॥

रजःशुक्रधरा शक्तिर्जरायुर्गर्भधारिणी ।
त्रिकालज्ञा त्रिलिङ्गा च त्रिमूर्तिस्त्रिपुरवासिनी ॥

अरागा शिवतत्त्वा च कामतत्त्वानुरागिणी ।
प्राच्यवाची प्रतीची दिगुदीची दिग्विदिग्दिशा ॥

अहंकृतिरहंकारा बाला माया बलिप्रिया ।
स्रुक्स्रुवा सामधेनी च सुश्रद्धा श्राद्धदेवता ॥

माता मातामही तृप्तिः पितृमातापितामही ।
स्नुषा दौहित्रिणी पुत्री पौत्रा नप्त्रा शिशुप्रिया ॥

स्तनदा स्तनधारा च विश्वयोनि: स्तनंधयी ।।
शिशूत्संगधरा दोला दोलाकीडाभिनंदिनी ।।
उर्वशो कदली केका विशिखा शिखिवर्तिनी ।
खट्वांगधारिणी खट्वा, बाणपुंखानुवर्तिनी ।।
लक्ष्यप्राप्सिकरा लक्ष्या लक्ष्या च शुभलक्षणा ।
वर्तिनी सुपथाचारा परिखा च खनिर्वृति: ।।
प्राकारवलया वेला मर्यादा च महोदधौ ।
पोषिणी शोषिणी शक्तिर्दीर्घकेशी सुलोमशा ।।
ललिता मांसला तन्वी वेदवेदांगधारिणी ।
नरासृक्पानमत्ता च नरमुण्डास्थिभूषणा ।।
अक्षक्रीडारति: सारी सारिका शुकभाषिणी ।
शाबरी गारुडी विद्या वारुणी वरुणार्चिता ।।
वाराही तुंडहस्ता च दंष्ट्रोद्धृतवसुंधरा ।
मीनमूर्तिधरा मूर्ता वदान्याऽप्रतिमाश्रया ।।
अमूर्ता निधिरूपा च शालिग्रामशिला शुचि: ।
स्मृति: संस्काररूपा च सुसंस्कारा च संस्कृति: ।।
प्राकृता देशभाषा च गाथा गीति: प्रहेलिका ।
इडा च पिंगला पिंगा सुषुम्णा सूर्यवाहिनी ।।
शशिस्रवा च तालस्था काकिन्यमृतजीविनी ।

अणुरूपा बृहद्रूपा लघुरूपा गुरुः स्थिरा ॥
स्थावरा जंगमा देवी कृतकर्मफलप्रदा ।
विषया कांतदेहा च निर्विशेषा जितेंद्रिया ॥

विश्वरूपा चिदानंदा परं ब्रह्मप्रबोधिनी ,
निर्विकारा च निर्वैरा विरतिः सत्यवर्धिनी ॥

पुरुषाज्ञा च भिन्ना च क्षांतिः कैवल्यदायिनी ।
विविक्तसेविनी प्रज्ञा जनयित्री बहुश्रुतिः ॥

निरीहा च समस्तैका सर्वलोकैकसेविता ।
सेवा सेवाप्रिया सेव्या सेवाफलविवर्धिनी ॥

कलौ कल्किप्रिया काली दुष्टम्लेच्छविनाशिनी ।
प्रत्यञ्चा च धनुर्यष्टिः खड्गधारा दुरानतिः ॥

अश्वप्लुतिश्च वल्गा च सृणिः सन्मृत्युवारणा ।
वीरभू र्वीरमाता च वीरसूर्वीरनंदिनी ॥

जयश्रीर्जयदीक्षा च जयदा जयवर्धिनी ।
सौभाग्यसुभगाकारा सर्वसौभाग्यवर्धिनी ॥

क्षेमंकरी सिध्दिरूपा सत्कीर्तिः पथिदेवता ।
सर्वतीर्थमयी मूर्तिः सर्वदेवमयी प्रभा ॥

सर्वसिद्धिप्रदा शक्तिः सर्वमंगलमंगला ।
पुण्यं सहस्रनामेदमंबाया रुद्रभाषितम् ।।
चतुर्वर्गप्रदं सत्यं नंदिकेन प्रकाशितम् ।
नातः परतरा विद्या तीर्थं नातः परात्परम् ।।
नातः परतरः स्तोत्रः भुवि प्रोक्तं मनीषिभिः ।
ते धन्यकृतपुण्यास्ते त एव भुवि पूजिताः ।।
एकवारं मुदा नित्यं येऽर्चयंति महेश्वरीम् ।
देवतानां देवता या ब्रह्माद्यैर्या च पूजिता ।।
भूयात्सा वरदा लोके साधूनां विश्वमंगला ।
एतामेव पुराराध्यां विद्यां त्रिपुरभैरवीम् ।।
त्रैलोक्यमोहिनीरूपमकार्षीद्भगवान् हरिः ।

भवानी नामसहस्रः
स्तवराजः
संपूर्णः

अथ इन्द्राक्षी स्तोत्रम्

^श्री शचि:

ओम् अस्य श्री इंद्राक्षीस्तोत्रमत्रस्य पुरंदरऋषिः अनुष्टुप्छंदः इंद्राक्षी देवता ह्रीं बीजम् ^क्लीं कीलकम् सकलकामना सिद्ध्यर्थं पाठे विनियोगः। अथ ध्यानम्।

इंद्राक्षीं द्विभुजां देवीं पीतवस्त्रधरां शुभाम्।
वामे हस्ते वज्रधरां दक्षिणे चाभयप्रदाम्॥

सहस्रनेत्रां सूर्याभां नानालंकारभूषिताम्।
प्रसन्नवदनां नित्यमप्सरोगणसेविताम्॥
श्रीदुर्गां सौम्यवदनां पाशांकुशधरां पराम्।

त्रैलोक्यमोहिनीं देवीं भवानीं प्रणमाम्यहम्।

इति ध्यानम्

ओम् ह्रीं श्रीं इंद्राक्षी स्वाहा।

इंद्र उवाच

इंद्राक्षी नाम सा देवी दैवतैः समुदाहृता।
गौरी शाकंभरी देवी दुर्गानाम्नोति विश्रुता॥

कात्यायनी महादेवी चंद्रघंटा महातपाः।
गायत्री सा च सावित्री ब्रह्माणी ब्रह्मवादिनी॥

नारायणी भद्रकाली रुद्राणी कृष्णपिंगला ।
अग्निज्वाला रौद्रमुखी कालरात्रिस्तपस्विनी ।
मेघश्यामा सहस्राक्षी विष्णुमाया जलोदरी ।
महोदरी मुक्तकेशी घोररूपा महाबला ॥
आनंदा भद्रदा नंदा रोगहंत्री शिवप्रिया ।
शिवदूती कराली च प्रत्यक्षा परमेश्वरी ।
इंद्राणी चंद्ररूपा च इंद्रशक्तिपरायणा ।
महिषासुरसंहर्त्री चामुंडा गर्भदेवता ॥
वाराही नारसिंही च भीमा भैरवनादिनी ।
श्रुतिः स्मृतिर्धृतिर्मेधा विद्या लक्ष्मीः सरस्वती ॥
आनंदा विजया पूर्णा मानस्तोकापराजिता ।
भवानी पार्वती दुर्गा हैमवत्यंबिका शिवा ॥
शिवा भवानी रुद्राणी शंकरार्धशरीरिणी ।
एतैर्नामपदैर्दिव्यैः स्तुता शक्रेण धीमता ॥
आयुरारोग्यमैश्वर्यं सुखसंपत्तिकारकम् ।
क्षयापस्मारकुष्ठादि तापज्वरनिवारणम् ॥
शतमावर्तयेद्यस्तु मुच्यते व्याधिबंधनात् ।
आवर्तयेत्सहस्रेण लभते वांछितं फलम् ॥

राज्यवश्यमवाप्नोति सर्वमेव न संशयः ।
लक्षमेकं जपेद्यस्तु साक्षाद्देवो भविष्यति ।

त्रिकालं पठते नित्यं धनधान्यं च संपदः ।
अर्धरात्रे पठेन्नित्यं मुच्यते पापबंधनात् ।।

इदं स्तोत्रमिदं पुण्यं जपेत्तु फलमाप्नुयात् ।
विनाशयति रोगाणामपमृत्युं हरत्युत ।।

राज्यार्थी लभते राज्यं धनार्थी विपुलं धनम् ।
इच्छाकामं तु कामार्थी धर्मार्थी धर्ममक्षयम् ।।

विद्यार्थी लभते विद्यां मोक्षार्थी परमं पदम् ।
इंद्रेण कथितं स्तोत्रं सत्यमेव न संशयः ।।

या माया मधुकैटभप्रमथिनी या माहिषोन्मूलिनी ।
या धूम्रेक्षणचण्डमुण्डमथिनी या रक्तबीजाशनी ।।

शक्तिः शुम्भनिशुम्भदैत्यदलिनी या सिद्धलक्ष्मीः परा ।
सा देवी नवकोटिमूर्तिसहिता मां पातु माहेश्वरी ।।

जप्तं पापहरं नुतं बलकरं सम्पूजितं श्रीकरम् ।
ध्यातं मानकरं स्तुतं धनकरं सम्भाषितं सिद्धिदम् ।।

गीतं सुन्दरि वाञ्छितं प्रतनुते ते पादपद्मद्वयम् ।
भक्तानां भवभीतिभञ्जनकरं सिद्ध्यष्टदं पातु नः ।।

माया कुण्डलिनो क्रिया मधुमती काली कला मालिनी ।
मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी ॥
शक्तिः शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी ।
ह्लींकारी त्रिपुरा परा परमयी माता कुमारीत्यसि ॥

अनेन मन्त्रपाठेन आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं श्रीइष्टदेवी प्रीत्यर्थं भगवती अमाकामा चार्वङ्गधारिणी तारा पार्वती यक्षिणी श्रीशारिका भगवती श्रीशारदा भगवती श्रीज्वाला-भगवती व्रीडा भगवती वैखरी भगवती वितस्ता भगवती गङ्गा भगवती यमुना भगवती सिद्धलक्ष्मीः महालक्ष्मीः महात्रिपुर-सुन्दरी सहस्रनाम्नी देवी भवानी सपरिवार सवाहना सायुधा साङ्गा प्रीयतां प्रीतास्तु ॥

इति इन्द्राक्षी स्तोत्रं सम्पूर्णम् ॥

***
*

अथ गौरी स्तुतिः

लीलाऽऽरब्धस्थापितलुप्ताऽखिललोकां
लोकाऽतीतैर्योगिभिरन्त हृदि मृग्याम् ।
बालाऽऽदित्य श्रेणि समानद्युतिपुंजाम्
गौरीमम्बम्बुरुहाक्षीमहमीडे ॥१॥

आशापाशक्लेशविनाशं विदधानां
पादाऽम्भोजध्यानपराणां पुरुषाणाम् ।
ईशीमीशाङ्गाऽर्धहरां तां तनुमध्यां
गौरीमम्बामम्बुरुहाक्षी. ॥२॥

प्रत्याहारध्यानसमाधिस्थितिभाजां
नित्यं चित्ते निर्वृतिकाष्ठां कलयन्तीम् ।
सत्यज्ञानाऽऽनन्दमयीं तां तडिदाऽऽभां
गौरीमम्बामम्बुरुहाक्षी. ॥३॥

चन्द्रापीडानन्दितमन्दस्मितवक्त्रां
चन्द्रापीडालङ्कृत लोलालकभाराम् ।
इन्द्रोपेन्द्राद्यर्चितपादाम्बुजयुगलां
गौरीमम्बाम्बुरुहाक्षी. ॥४॥

नानाकारैः शक्तिकदम्बैर्भुवनानि
व्याप्य स्वैरं क्रीडति याऽसौ स्वयमेका ।
कल्याणीं तां कल्पलतामानतिभाजां
गौरीमम्बामम्बुरुहाक्षी. ॥५॥

मूलाधारादुत्थितवन्तीं विधिरन्ध्रं
सौरं चान्द्रं धाम विहाय ज्वलिताङ्गीम् ।
स्थूलां सूक्ष्मतरां तामभिवन्द्यां
गौरीमम्बामम्बुरुहाक्षी. ॥६॥

आदिक्षान्तामक्षरमूर्त्या विलसन्तीं
भूते भूते भूतकदम्बं प्रसवित्रीम् ।
शब्दब्रह्माऽऽनन्दमयीं तामभिरामां
गौरीमम्बामम्बुरुहाक्षी. ॥७॥

यस्याः कक्षौ लीनमण्डं जगदण्डं
भूयो भूयः प्रादुरभूदक्षतमेव ।
भर्त्रा सार्धं तां स्फटिकाद्रौ विहरन्तीं
गौरीमम्बामम्बुरुहाक्षी ॥८॥

यस्यामेतत्प्रोतमशेषं मणिमाला
सूत्रे यद्वत्क्वापि चरं चाप्यचरं च ।

नमो पुष्पशय्या गले पुष्पमाला ।
सदा कोकिला कांचनी रूपवर्णी ।
सदा रणविषे शत्रुसंहारकरणी ।
नमो संकटा कष्टहरिणी भवानी ।।५।।

तुही संकटे योगिनी योगधारम् ।
तुही कामिनी मोहितं कामराज्यम् ।
तुही विश्वमाता करे खड्गधारम् ।
नमो संकटा कष्टहरिणी भवानी ।।६।।

———

दुर्गा सप्तशती

ओम् ज्ञानिनामपि चेतांसि देवी भगवती हि सा
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥१॥

ओम् दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतोवशुभां ददासि ।

दारिद्र्यदुःखभयहारिणी का त्वदन्या ।
सर्वोपकारकरणाय दयार्द्रचित्ता ॥२॥

ओम् सर्वमङ्गलमांगल्ये शिवे सर्वार्थसाधिके
शरण्ये त्र्यम्बके गौरी नारायणि नमोस्तु ते ॥३॥

ओम् शरणागतदीनार्तपरित्राणपरायणे
सर्वस्यार्तिहरे देवि नारायणि नमोस्तु ते ॥४॥

ओम् सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते ॥५॥

ओम् रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ।

त्वामाश्रितानां न विपन्नराणाम्
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥६॥

ओम् सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि
ऐवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥७॥

ओम् शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके
घण्टास्वनेन नः पाहि चापज्यानिस्वनेन च ॥८॥

—:०:—

शुक्रियं रुद्रस्य

ओम् शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा।
शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः।
नमो ब्रह्मणे नमो वायवे नमस्ते वायो त्वमेव
प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि
ऋतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु
तद्वक्तारमवत्ववतु मामवतु वक्तारम्।
शान्तिः शान्तिः शान्तिः।

सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै तेजस्वि
वधीतमस्तु मा विद्विषावहै।
शान्तिः शान्तिः शान्तिः॥

